# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-२ (SEM-4) | **प्रश्नपत्रम्** - २ | **गुणाः** – ७० |
| **विषयः** -वास्तुशास्त्रम्म् | **कोड- CC- 5410** | **समयः** – ११ तः २ |
| **दिनाङ्कः** – ३०/०३/२०१९ | **सन्दर्भग्रन्थः**-प्रासादमण्डनम् – बृहत्संहिता (वास्तुविद्याध्यायः) | |

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधो लिखितयोः कस्यचित् एकस्य श्लोकस्य व्याख्या कार्या ।** ०५

१. न्यूनाधिकं प्रसिद्धं च यत्किञ्चिन्म(ा)ण्डनोदितम् ।
विश्वकर्मप्रसादेन शिल्पिभिर्मा(नो)न्यतां वचः ॥

२. चतुर्भागं समारभ्य यावत् सूर्योत्तरं शतम् ।
भागसंख्येति विख्यातं फालनात्कर्णबाह्यतः ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत ।** १०

१ लम्बचतुरस्रप्रासादः ।

२ अथ तलानुसारे प्रासादः ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ अधो लिखितयोः कस्यचित् एकस्य व्याख्या कार्या ।** ०५

१ एकादशशतान्येवं वितानानां त्रयोदश । शुद्धसङ्घाटमिश्राणि क्षिप्रोत्क्षिप्तानि यानि च ॥

२ मूलप्रासादद्वारमण्डपे च बलाणके । न्यूनाधिकं न कर्तव्यं दैर्घ्ये हस्ताङ्गुलाधिकम् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य विवरणं कुरुत ।** १०

१ पञ्चविधबलाणकम् ।

२ नृत्यमण्डपाः ।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधो लिखितयोः कस्यचित् एकस्य व्याख्या कार्या ।** ०५

१ पूर्वोत्तरं दिशामूढं मूढं पश्चिमदक्षिणे । तत्र मूढममूढं वा यत्र तीर्थं समाहितम् ॥

२ ऐ-(ई)शान्ये चरकीं बाह्ये पिलिपिच्छास्तु (पीलीपीछातु) पूर्वतः ।
विदारिकाग्निकोणे च जृम्भा याम्यदिगाश्रिता (विष्टम्भायदिगामिताद्)॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** १०

१ वास्तुपुरुषोद्भवः ।

२ प्रतिष्ठादिवसविमर्शः प्रतिष्ठोपयोगीर्क्षम् ।

**॥ चतुर्थान्वितिः ॥** (Unit-4)

**प्रश्नः ७ अधो लिखितयोः कस्यचित् एकस्य व्याख्या कार्या ।** ०५

१ रोगाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात् ।
मुख्याद्भृशं जयन्ताच्च भृङ्गमतितेश्च सुग्रीवम् ॥
तत्सम्पाता नव ये तान्यति मर्माणि सम्प्रदिष्टानि ।
यश्च पदस्याष्टांशस्तत् प्रोक्तं मर्मपरिमाणम् ॥

२ प्रागुक्तेरान्नते धनसुतक्षयः सुतवधश्च दुर्गन्धे ।
वक्रे बन्धुविनाशो न सन्ति गर्भाश्च दिङ्मूढे ॥
इच्छेद्यदि गृहवृद्धिं ततः समन्ताद्विवर्धयेत्तुल्यम् ।
एकोद्देशे दोषः प्रागथवाऽप्युत्तरे कुर्यात् ॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

१ मार्गादिवेधितद्वारफलम् ।

२ वास्तुपुरुषाङ्गविभागेन देवतायाः स्थापनम् ।

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१ आचार्यमण्डनः, प्रथमसूत्रकारः इति कः स्वीकरोति?

२ 'महाभोग' इति कस्य संज्ञा भवति?

३ महाभोगप्रासादस्य फलं किम्?

४ मेरुप्रसादः केषां देवानां कृते निर्मीयते?

५ भित्तिशब्दस्य अर्थः कः?

६ षष्ठेऽध्याये प्रासादानां का संख्या गृहीता?

७ सर्वेषु प्रासादेषु सर्वोत्तमराजतुल्यप्रासादः कः?

८ पञ्चविंशतिप्रासादेषु प्रथमप्रासादः कः?

९ केसरीप्रासादस्य उपमा का?

१० बलाणकानां संख्या का?

११ देवालये यदि शिखरं निर्धारितमानतोऽधिकदीर्घं चेत् तदा फलं किम्?

१२ पापस्थानानि लिखन्तु ।

१३ देवालयनिर्माणारम्भतः देवप्रतिष्ठां यावत् कति कर्माणि भवन्ति?

१४ वास्तुविद्याध्यायः बृहत्संहिताग्रन्थस्य पूर्वार्धे अस्ति उत्तरार्धे वा?

१५ गृहनिर्माणे कः सर्वोत्तमः वृक्षः स्वीकरणीयः?

०००